षष्ठः पाठः

# क्षमावीरो विजयते

**अस्माकं भारते प्रजातान्त्रिकं शासनम् अस्ति। अस्य शासनस्य चत्वारः प्रमुखाः स्तम्भाः सन्ति-स्वतन्त्रता, समानता, बन्धुता एवं न्यायः। भगवान् महावीरः सार्धद्विसहस्रवर्षाणि पूर्वम् एव एतेषां मूल्यानां प्रतिष्ठापनम् अकरोत्। भोगादिविषयेभ्यः निवृत्तिः, सर्वसत्त्वेभ्यः अभयदानं, तेषां दुःखनिवारणम्, अरिषु मित्रेषु च समभावः, सार्वभौमिके बन्धुत्वे विश्वासः, तर्कपूर्णः व्यवहारः इत्येतेषां जीवनमूल्यानां साक्षात् आदर्शभूतः एव अयं महापुरुषः। अस्य तपोमयजीवनं सर्वेभ्यः शिक्षाप्रदम्।**

धन्यः अयं भगवान् महावीरः यः लोककल्याणाय महान्ति कष्टानि अनुभवन् तपोमयं जीवनम् अयापयत्। अयं तपस्वी रिव्रष्टाब्दात् पूर्वं प्रायः पञ्चम्यां शताब्द्याम् आविरभूत्। अस्य पिता राजा सिद्धार्थः माता च त्रिशला आसीत्। बाल्यादेव बालमित्रैः सह विविधाः क्रीडाः कुर्वन्नपि कदापि दोषपूर्णम् आचरणं न कृतवान्। एकदा स भयङ्करविषधरात् स्वमित्राणि अरक्षत्। तस्मादेव क्षणात् अतुलितबलशाली एषः वर्धमानः महावीरः इति प्रसिद्धः अभवत्।

अयं महात्मा संसारस्य सारहीनतां जानन् अपि, संन्यासदीक्षाम् इच्छन् अपि मातापित्रोः अनुरोधेन विवाहम् अकरोत्। अष्टादशवर्षपर्यन्तं वैराग्यपूर्वकं गृहस्थधर्मं पालयतः तस्य पितरौ दिवं गतौ। ततः सर्वं राज्यलोभं परित्यज्य स्वाग्रजस्य अनुमत्या वनं प्राविशत् घोरतरं तपः च अतपत्। सुखदुःखे, मानापमानौ च तस्य कृते समौ आस्ताम्। असौ बहुवारं तस्करैः दुष्टैः च गृहीतः पीडितश्च। विविधैः वन्यैः पशुभिः दष्टः अपि स व्रतभङ्गम् न अकरोत्। द्वादशवर्षपर्यन्तं मौनम् अधारयत्। शनैः शनैः तस्य हृदयात् सर्वे विकाराः अपगताः। एवं कैवल्यज्ञानम् अनुभूय स अरिहन्ता (जीवन्मुक्तः) अभवत्। तदा लोककल्याणाय धर्मप्रचाराय च भारते स्थानात् स्थानम् अभ्रमत्।

एकदा कश्चन विद्याधरः महाराजचेटकस्य कनिष्ठां पुत्रीं चन्दनबालाम् अपहृत्य आपणे विक्रयणार्थम्

आनीतवान्। धर्मपरायणः एकः श्रेष्ठी तां कुलीनां मत्वा तस्याः मूल्यं प्रदाय गृहञ्च आनीय पुत्रीवत् अपालयत्। कालान्तरे स श्रेष्ठी विदेशं गतवान्। तस्य पत्नी चन्दनबालाम् अन्धप्रकोष्ठे अपातयत्, प्रतिदिनं च मृत्तिकापात्रे केवलं मुष्टिकामात्रम् ओदनं भोजनाय अयच्छत्। दैववशात् भगवान् महावीरः श्रेष्ठिनः गृहस्य पुरतः भिक्षार्थं गच्छति स्म।



चन्दनबाला स्वमृत्तिकापात्रे स्थितं सर्वम् ओदनं भगवते समर्पितवती। भगवान् आहारं स्वीकृत्य अग्रे गतवान्। मृत्तिकापात्रं तस्य स्पर्शमात्रेण स्वर्णपात्रम् अभवत्। एषः समाचारः सम्पूर्णवत्सदेशे प्रासरत्। वत्सदेशस्य पट्टमहिषी मृगावती अपि तं समाचारं श्रुत्वा तस्याः दर्शनार्थम् आगता, चन्दनबालां च दृष्ट्वा ज्ञातवती यत् सा तस्याः एव पूर्वापहृता भगिनी आसीत्। सा चन्दनबालां राजभवनम् अनयत् परन्तु चन्दनबाला अल्पे एव वयसि संसारस्य निस्सारताम् अनुभूय 'आर्यिका' अभवत्, अपि च तपोबलात् षट्त्रिंशत्सहस्राणाम् आर्यिकाणां संघस्य प्रमुखगणिनी जाता।

अहिंसायाः प्रचारं कुर्वन् भगवान् महावीरः न केवलं मानुषेषु अपितु पशुपक्षिषु वनस्पतिषु अपि हिंसायाः निषेधम् उपादिशत्। अस्य प्रमुखाः उपदेशाः सन्ति–सम्यग्दर्शनम्, सम्यग्ज्ञानम्, सम्यक् चरितम् च। इमे रत्नत्रयम् इति मन्यन्ते। तस्य मते आचार एव श्रेष्ठतायाः कारणम्। जीवेषु सर्वेषु दया कर्तव्या। न कश्चिद् गर्हणीयः। भोगाः दुःखदाः। क्षमया, धैर्येण, मनसः दमेन, इन्द्रियाणां निग्रहेण, शान्त्या च मनोविकारान् दूरीकृत्य कैवल्याय प्रयतनीयम्।

अन्ते द्विसप्ततितमे वयसि कार्त्तिकमासस्य अमावस्यायां (कृष्णां रात्रिमपि दीपानाम् आलोकेन प्रभामयीं कारयन्) एष 'पावा' नगर्यां निर्वाणम् आप्तवान्। अहिंसा परमो धर्मः इति तस्य उद्घोषः अद्यतावत् जनान् प्रेरयति प्रेरयिष्यति च।

संसारदावानलदाहनीरं,

सम्मोहधूलिहरणे समीरम् ।

मायारसादारणसारसीरम् ।

नमामि वीरं गिरिसारधीरम् ।।

## अनुप्रयोगः

1. **अधोलिखितशब्दान् उच्चैः पठत –**

मानापमानौ, समौ, तस्करैः, दुष्टैः, विविधैः, वन्यैः, मौनम्, शनैः शनैः, कैवल्यज्ञानम्, दैवशात्, धैर्येण ।

2. **अधोलिखितवाक्येषु सङ्ख्यावाचकपदैः रिक्तस्थानपूर्तिं कुर्वन्तु –**

(क) भगवान् महावीरः खिष्टात् पूर्वं ........................ शताब्द्याम् आविरभूत् ।

(ख) ........................ वर्षपर्यन्तं महावीरः गृहस्थधर्मं पालितवान् ।

(ग) ........................ वर्षपर्यन्तं महावीरः मौनम् अधारयत् ।

(घ) चन्दनबाला ........................ आर्यिकाणां सङ्घस्य गणिनी जाता ।

(ङ) एतानि ........................ रत्नानि मन्यन्ते ।

(च) ........................ वयसि कार्त्तिकमासस्य अमावस्यायां निर्वाणं प्राप्तवान् ।

3. **पाठात् चित्वा अधोलिखितशब्दानां विलोमपदानि लिखत –**

| | | | |
|---|---|---|---|
| (क) सारयुक्ताम् | ........................ | (ङ) पृष्ठतः | ........................ |
| (ख) अनुजस्य | ........................ | (च) सुखदाः | ........................ |
| (ग) मानः | ........................ | (छ) आदौ | ........................ |
| (घ) आदाय | ........................ | (ज) प्रशंसनीयः | ........................ |

4. **विशेषणानि विशेष्यैः सह मेलयत –**

| *विशेषणानि* | *विशेष्याणि* |
|---|---|
| (क) महान्ति | (i) वयसि |
| (ख) तस्मिन् | (ii) उपदेशाः |

| | | | |
|---|---|---|---|
| (ग) | मुष्टिकामात्रम् | (iii) | रात्रिम् |
| (घ) | अल्पे | (iv) | कष्टानि |
| (ङ) | परमः | (v) | काले |
| (च) | प्रमुखाः | (vi) | धर्मः |
| (छ) | पट्टमहिषी | (vii) | ओदनम् |
| (ज) | कृष्णाम् | (viii) | मृगावती |

**5. क्त्वा/ल्यप् प्रत्ययस्य प्रयोगेण वाक्यद्वयं योजयत –**

(क) अ. कश्चित् श्रेष्ठी चन्दनबालां कुलीनां मन्यते।

आ. कश्चित् श्रेष्ठी मूल्यं प्रदाय तां गृहं नीतवान्।

(ख) अ. मृगावती चन्दनबालां पश्यति।

आ. मृगावती ज्ञातवती यत् चन्दनबाला तस्याः एव भगिनी आसीत्।

(ग) अ. मृगावती समाचारं श्रृणोति।

आ. मृगावती चन्दनबालायाः दर्शनार्थं गच्छति।

(घ) अ. महावीरः राज्यलोभं परित्यजति।

आ. महावीरः स्वाग्रजस्य अनुमत्या वनं गच्छति।

(ङ) अ. महावीरः कैवल्यज्ञानम् अनुभवति।

आ. महावीरः अरिहन्ता अभवत्।

(च) अ. महावीरः आहारं स्वीकृतवान्।

आ. महावीरः अग्रे गच्छति।

**6. अधोलिखितक्रियापदेषु 'क्तवतु' प्रत्ययस्य स्थाने लङ्लकारस्य, लङ्लकारे प्रयुक्तानां क्रियापदानां स्थाने 'क्तवतु' प्रत्ययस्य प्रयोगः क्रियताम् –**

| | | ***भूतकालिकक्रियापदानि*** | ***'क्तवतु' प्रत्ययान्तपदानि*** |
|---|---|---|---|
| (क) | यथा | अयापयत् | यापितवान् |
| (ख) | | ............. | कृतवान् |
| (ग) | | अभवत् | ............. |

| | | |
|---|---|---|
| (घ) | ............ | तप्तवान् |
| (ङ) | ............ | आनीतवान् |
| (च) | अयच्छत् | ............ |
| (छ) | ............ | गतवान् |
| (ज) | अजानात् | ............ |
| (झ) | प्राप्नोत् | ............ |
| (ञ) | ............ | प्रसृतवान् |

**7. अधोलिखितेषु एकं कथनम् अशुद्धम् अस्ति। तत् कथनं चिह्नीकुरुत –**

(क) भगवान् महावीरः पशुपक्षिषु अपि हिंसायाः निषेधम् अकरोत्।

(ख) चन्दनबाला वत्सदेशस्य पट्टमहिषीमृगावत्याः भगिनी आसीत्।

(ग) सम्यग्दर्शनम्, सम्यक्पूजनं, सम्यक्चरित्रं च रत्नत्रयम् आसीत्।

(घ) श्रेष्ठिनः पत्नी चन्दनबालां प्रति सम्यक् व्यवहारं न करोति स्म।

(ङ) विकारहीनः भूत्वा स कैवल्यज्ञानं प्राप्तवान्।

**8. अधोलिखितशिक्षासु रिक्तस्थानपूर्त्तिं कुरुत –**

(क) भगवतः महावीरस्य मते ................. एव श्रेष्ठतायाः कारणम्।

(ख) जीवेषु ................. कर्तव्या।

(ग) मनुष्येण ................. दूरीकृत्य कैवल्याय प्रयतनीयम्।

(घ) वनस्पतिषु अपि स ................. निषेधम् अकरोत्।

(ङ) ................. दुःखं प्रयच्छन्ति।

(च) नरः ................. लिप्तः न भवेत्।

**9. अधोलिखितभावार्थे रिक्तस्थानपूर्त्तिः क्रियताम् –**

अहं भगवन्तं महावीरं ................. यः संसाररूपिदावाग्नेः दाहं दूरीकर्तुं जलम् इव अस्ति, यः सम्मोहस्य धूलिं निवारयितुं ................. , यः च मायारूपिपृथ्वीं विदारयितुम् ................. एव अस्ति, यश्च पर्वतसमं ................. अस्ति।

10. **अधोलिखितवाक्यानि कथाक्रमेण पुनः लिखत -**

(क) महावीरः द्वादशवर्षपर्यन्तं मौनम् अधारयत्।

(ख) महावीरः स्वाग्रजस्य अनुमत्या वनं प्राविशत्।

(ग) चन्दनबाला षट्त्रिंशत्सहस्राणाम् आर्यिकाणां संघस्य प्रमुखगणिनी जाता।

(घ) महावीरः पावानगर्यां निर्वाणम् आप्तवान्।

(ङ) महावीरस्य पिता राजा सिद्धार्थः आसीत्।

(च) भगवान् महावीरः खिष्टात् पूर्वं पञ्चम्यां शताब्द्याम् आविरभूत्।

(छ) महावीरः चन्दनबालायाः उद्धारम् अकरोत्।

(ज) महावीरः कैवल्यज्ञानं प्राप्य प्रचारकार्ये संलग्नः अभवत्।

## पाठविकासः

### क. सम्यक्त्वम् इति किम् ?

तत्त्वरुचिः सम्यक्त्वं, तत्त्वप्रख्यापकं भवेज्ज्ञानम्।

पापक्रियानिवृत्तिश्चरित्रमुक्तं जिनेन्द्रेण। (ज्ञानार्णवः पृ. 91)

(i) सम्यक् दर्शनम् तत्त्वं प्रति श्रद्धा।

(ii) सम्यक् ज्ञानम् तत्त्वस्य परमसत्यस्य ज्ञानं, विवेकबुद्धिः।

(iii) सम्यक् चरितम् पापकर्मभ्यः निवृत्तिः, शुद्धाचरणम्।

### ख. अहिंसा

हिंसैव दुर्गतेर्द्वारं, हिंसैव दुरितार्णवः।
हिंसैव नरकं घोरं, हिंसैव गहनं तमः॥

यत्किञ्चित्संसारे शरीरिणां दुःखशोकभयबीजम्।
दौर्भाग्यादिसमस्तं तद्धिंसासम्भवं ज्ञेयम्॥ (ज्ञानार्णवः पृ. 120)

### ग. कैवल्यम्/केवलज्ञानम्

मोक्षः - आत्मनः चरमविकासः। जन्ममरणबन्धनाद् मुक्तिः।